CC-0. In Public Domain. Digitization by eGangotri

Almira 2
Shelf 3
25

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नं.४८४८

अथ आदित्यहृदय प्रारंभः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः॥ ॥श्रीसूर्य्यायनमः ॥ ॥ अथआदित्यहृदयप्रारंभः ॥ ॥ आचम्यदेशकालौसंकीर्त्य ममारो
ग्याद्यावाप्तये श्रीसाबितृसूर्यनारायणप्रीत्यर्थंद्वादशनमस्काराख्यंकर्मकरिष्ये॥ ॥ अथध्यानम् ॥ ध्येयः सदा सवितृमंडल
मध्यवर्ती नारायणःसरसिजासनसन्निविष्टः ॥ केयूरवान्मकरकुंडलवान्किरीटीहारीहिरण्मयवपुर्ध्रतशंखचक्रः॥ १॥ ए
कचक्ररथोयस्यादिव्यः कनकभूषितः ॥ समेभवतुसुप्रीतःपद्महस्तोदिवाकरः ॥ २ ॥ मित्रायनमः॥ रवयेनमः॥ सूर्याय
नमः ॥ भानवेनमः॥ खगायनमः॥ पूष्णेनमः॥ हिरण्यगर्भायनमः ॥ मरीचयेनमः ॥ आदित्यायनमः॥ सवित्रेनमः
अर्कायनमः॥ भास्करायनमः॥ १२॥ नमःसवित्रेजगदेकचक्षुषेजगत्प्रसूतिस्थितिनाशहेतवे॥ त्रयीमयायात्रिगुणात्मधा
रिणेविरिंचिनारायणशंकरात्मने ॥ १ ॥ नमोस्तुसूर्यायसहस्ररश्मयेसहस्रशाखान्वितसंभवात्मने ॥ सहस्रयोगोद्भवभाव
भागिनेसहस्रसंख्यायुगधारिणेनमः॥ ॥आदित्यस्यनमस्कारंयेकुर्वंतिदिनेदिने ॥जन्मांतरसहस्रेषुदारिद्र्यंनोपजायते ॥
॥ ३ ॥ इतिनमस्कारः ॥ ॥ शतानीकउवाच ॥ ॥ कथमादित्यमुद्यंतमुपतिष्ठेद्द्विजोत्तम ॥ एतन्मे ब्रूहि विप्रेंद्रप्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नी. ४-८४८

पद्येशरणंतब ॥ १ ॥ सुमंतुरुवाच ॥ इदमेवपुरापृष्टःशंखचक्रगदाधरः ॥ प्रणम्यशिरसा देवमर्जुनेनमहात्मना ॥ २ ॥
कुरुक्षेत्रे महाराज प्रवृत्ते भारते रणे ॥ कृष्णनाथं समासाद्य प्रार्थयित्वा ब्रवीदिदम् ॥ ३ ॥ अर्जुन उवाच ॥ ज्ञानंचधर्मशा
स्त्राणांयद्याद्भुद्यतरं तथा ॥ मया कृष्ण परिज्ञातं वाङ्मयं सचराचरम् ॥ ४ ॥ सूर्यस्तुतिमयं न्यासं वक्तुमर्हसिमाधव ॥ भ
क्त्यापृच्छामिदेवेश कथयस्व प्रसादतः ॥ ५ ॥ सूर्यभक्तिं करिष्यामि कथं सूर्यं प्रपूजयेत् ॥ तदहं श्रोतुमिच्छामित्व-
त्प्रसादेन यादव ॥ ६ ॥ श्रीभगवानुवाच ॥ रुद्रादिदैवतैः सर्वैःपृष्टेन कथितंमया ॥ वक्ष्यंहंसूर्यविन्यासं शृणुपाण्डव य
त्नतः ॥ ७ ॥ अस्माकंयत्त्वया पृष्टमेकचित्तो भवार्जुन ॥ तदहं संप्रवक्ष्यामि आदिमध्यावसानकम् ॥ ८ ॥ अर्जुनउ
वाच ॥ नारायण सुरश्रेष्ठपृच्छामि त्वांमहायशाः ॥ कथमादित्यमुद्यंतमुपतिष्ठेत्सनातनम् ॥ ९ ॥श्रीभगवानुवाच ॥ सा
धु पार्थमहाबाहोबुद्धिमानसि पाण्डव ॥ यन्मांपृच्छस्युपस्थानंतत्पवित्रंविभावसोः ॥ १० ॥ सर्वमंगलमांगल्यं सर्वपापप्र
णाशनम् ॥ सर्वरोगप्रशमनमायुर्वर्धनमुत्तमम् ॥ ११ ॥ अमित्रदमनं पार्थ संग्रामेजयवर्धनम् ॥ वर्धनं धनपुत्राणामा

Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दित्यहृदयं शृणु ॥ १२ ॥ यच्छ्रुत्वासर्वपापेभ्योमुच्यते नात्रसंशयः ॥ त्रिषुलोकेषु विख्यातं निःश्रेयसकरं परम् ॥ १३ ॥ देवदेवंनमस्कृत्यप्रातरुत्थाय चार्जुन ॥ विघ्नान्यनेकरुपाणि नश्यंति स्मरणादपि ॥ १४ ॥ तस्मात्सर्वप्रयत्नेन सूर्यमाबाहये त्सदा ॥ आदित्यहृदयं नित्यंजाप्यं तच्छ्रुणुपांडव ॥ १५ ॥ यज्जपान्मुच्यते जंतुर्दारिद्र्याद्दाशुदुस्तरात् ॥ लभतेच महासिद्धिं कुष्ठव्याधिविनाशिनीम् ॥ १६ ॥ अस्मिन्मंत्रेऋषिश्छंदोदेवताशक्तिरेव च ॥ सर्वमेव महाबाहो कथयामितबाग्रतः ॥ १७ ॥ मया ते गोपितं न्यासंसर्वशास्त्रप्रबोधितम् ॥ अथतेकथयिष्यामि उत्तमंमंत्रमेव च ॥ १८ ॥ ॐअस्यश्रीआदित्यहृदयस्तोत्रमंत्रस्य ॥ श्रीकृष्णऋषिः ॥ श्रीसूर्यात्मा त्रिभुवनेश्वरोदेवताअनुष्टुपछंदः हरितहयरथंदिवाकरंघृणिरितिबीजम् ॥ ॐनमो भगवते जितवैश्वानरजातवेदस ॥ इतिशक्तिः ॥ ॐनमो भगवते आदित्यायनमः इति कीलकम् ॥ ॐअग्निर्गर्भदेवताइतिमंत्रः ॥ ॐनमोभगवतेतुभ्यमादित्याय नमोनमः ॥ श्रीसूर्यनारायणप्रित्यर्थं जपेविनियोगः ॥ अथन्यासः ॥ ॐहांअंगुष्ठाभ्यांनमः ॥ ॐहींतर्जनिभ्यांनमः ॥ ॐहूंमध्यमाभ्यांनमः ॐहैंअनामिकाभ्यांन-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मः ॥ ॐह्रैं कानिष्ठिकाभ्यां नमः ॥ ॐह्रः करतलकरपृष्ठाभ्यांनमः ॥ ॐह्रां त्हृदयाय नमः ॐह्रीं शिरसेस्वाहा ॐह्रूंशिखायैवषट् ॥ ॐह्रैंकवचायहुं ॥ ॐह्रौंनेत्रत्रयाय वौषट् ॐह्रः अस्त्रायफट् ॥ ॐह्रांह्रींह्रूंह्रैंह्रौंह्रः इति दिग्बंधः ॥ अथ ध्यानम् ॥ भास्वद्रत्नाढ्यमौलिः स्फुरदधररुचारंजितश्चारुकेशोभास्वान्यो दिव्यतेजाः करकमलयुतःस्वर्णबर्ण प्रभाभिः ॥ बिश्वाकाशावकाशग्रहपतिशिखरे भातियश्चोदयाद्रौ सर्वानन्दप्रदाताहरिहरनामितःपातु मांबिश्वचक्षुः ॥ १ ॥ पूर्व मष्टदलं पद्मं प्रणवादिप्रतिष्ठितम् ॥ मायाबिजंदलाष्टाग्रे यंत्रमुद्धा रयेदिति ॥ २ ॥आदित्यंभास्करंभानुंरविंसूर्यादिवाकरम् ॥ मार्तंडंतपनंचेतिदलेष्वष्टसु योजयेत् ॥ ३ ॥ दीप्तासूक्ष्माजया भद्राबिभूतिर्बिमला तथा ॥ अमोघा विद्युताचेति मध्येश्रीः सर्वतोमुखी ॥ ४ ॥ सर्वज्ञः सर्बगश्चैव सर्बकारणदेवता ॥ सर्बेशंसर्बत्हृदयंनमामिसर्बसाक्षिणम् ॥ ५ ॥ सर्वात्मा सर्वकर्ताचसृष्टिजीवनपालकः ॥ हितः स्वर्गापबर्गश्च भास्करेश नमोऽस्तुते ॥ ६ ॥ इतिप्रार्थना ॥नमो नमस्तेऽस्तुसदा बिभावसोसर्बात्मने सप्तहयायभानवे ॥ अनंतशक्तिर्माणिभूषणेन ददस्व भुक्तिं मम मुक्तिमव्ययाम् ॥ ७ ॥ अर्कतु मूर्ध्नि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विन्यस्य ललाटे तु रविं न्यसेत् ॥ विन्यसेन्नेत्रयोः सूर्यं कर्णयोश्चदिवाकरम् ॥ ८ ॥ नासिकायां न्यसेद्भानुं मुखे वै भास्करं न्यसेत् ॥ पर्जन्यमोष्ठयोश्चैव तीक्ष्णं जीव्हांतरे न्यसेत् ॥ ९ ॥ सुवर्णरेतसं कंठे स्कंधयोस्तिग्मतेजसम् ॥ बाव्होस्तु पूषणंचैव मित्रंवै पृष्ठतो न्यसेत् ॥ १० ॥ वरुणंदक्षिणेहस्ते त्वष्टारं वामतः करे ॥ हस्ताबुष्णकरःपातुत्हृदयंपातु भानुमान् ॥ ११ ॥ उदरे तु यमं विंद्यादादित्यं नाभिमंडले ॥ कट्यां तु विन्यसेद्धंसं रुद्रमूर्वोस्तु विन्यसेत् ॥ १२ ॥ जान्वोस्तु गोपतिं न्यस्यस वितारं तुजंघयोः ॥ पादयोश्च विवस्वंतं गुल्फयोश्च दिवाकरम् ॥ १३ ॥ वाह्यतस्तु तमोध्वंसंभगमभ्यंतरे न्यसेत्॥सर्वांगेषु सहस्रांशुं दिग्विदिक्षुभगं न्यसेत् ॥ १४ ॥ इतिदिग्बंधः ॥ एष आदित्यविन्यासो देवानामपि दुर्लभः ॥ इमंभक्त्या न्यसेत्पार्थ स याति परमांगतिम् ॥ १५ ॥ कामक्रोधकृता त्पापा न्मुच्यते नात्र सम्शयः ॥ सर्पादपि भयं नास्तिसंग्रामेषु पथिष्वपि ॥ १६ ॥ रिपुसंघट्टकालेषुतथाचोरसमागमे ॥ त्रिसंध्यंजपतोन्यासंमहापातकनाशनम् ॥ १७ ॥ बिस्फोटकसमुत्पन्नंतिब्ज्वरसमुद्भवम् ॥ शिरोरोगंनेत्ररोगंसर्वव्याधिविनाशनम् ॥ १८ ॥ कुष्ठव्याधि स्तथा दद्रुरोगाश्च विविधाश्चये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ जपमानस्यनश्यन्ति श्टणुभक्त्या तदर्जुन ॥ १९ ॥ आदित्योमन्त्रसंयुक्तआदित्यो भुवनेश्वरः ॥ आदित्यान्नापरो दे
बोह्यादित्य :परमेश्वरः ॥ २० ॥ आदित्यमर्चयेद्ब्रह्मा शिबआदित्यमर्चयेत् ॥ यदादित्यमयं तेजोममतेजस्तदर्जुन ॥ २१ ॥
आदित्यंमन्त्रसंयुक्त मादित्यंभुवनेश्वरम् ॥ आदित्यंयेप्रपश्यन्ति मांपश्यन्तिनसंशयः ॥ २२ ॥ त्रिसन्ध्यमर्चयेत्सूर्य स्मरेद्भ
क्त्यातुयो नरः ॥ नसपश्यतिदारिद्र्यं जन्मजन्मनि चार्जुन ॥ २३ ॥ एत त्ते कथितं पार्थ आदित्यत्द्दयंमया ॥ श्टण्वन्मुक्त
श्च पापेभ्यः सूर्यलोके महीयते ॥ २४ ॥ नमो भगबते तुभ्यमादित्याय नमो नमः ॥ आदित्यःसबिता सूर्यः खगः पूषा गभ
स्तिमान् ॥ २५ ॥ सुबर्णः स्फाटिको भानुः स्फुरितो बिश्वतापनः ॥ रविर्विश्वोमहातेजाः सुबर्णः सुप्रबोधकः ॥ २६ ॥ हिर
ण्यगर्भस्त्रिशिरास्तपनो भास्करोरविः ॥ मार्तंडोगोपतिः श्रीमान्कृतज्ञ श्च प्रतापवान् ॥ २७ ॥ तमिस्रहा भगो हंसो नास
त्यश्च तमोनुदः ॥ शुद्धोबिरोचनः केशी सहस्रांशुर्महाप्रभुः ॥ २८ ॥ बिवस्वान्पूषणो मृत्युर्मिहिरो जामदग्न्यजित् घर्मर
श्मिः पतंगश्च शरण्यो मित्रहा तपः ॥ २९ ॥ दुर्विज्ञेयगतिः शूरस्तेजोराशिर्महायशाः ॥ शंभुश्चित्रांगदःसौम्यो हव्यक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यप्रदायकः ॥ ३० ॥ अंशुमानुत्तमो देव ऋग्यजुःसामएवच ॥ हरिदश्वस्तमोदारःसप्तसप्तिर्मरीचिमान्॥ ३१ ॥ अभि
गर्भो दितेः पुत्रः शंभुस्तिमिरनाशनः ॥ पूषा विश्वंभरो मित्रःसुवर्णः सुप्रतापवान्॥ ३२ ॥ आतपी मंडलीभास्वांस्त
पनःसर्वतापनः ॥ कृतविश्वो महातेजाःसर्वरत्नमयोद्भवः ॥ ३३ ॥ अक्षरश्च क्षरश्चैव प्रभाकरविभाकरौ ॥ चन्द्रश्चन्द्रांगदःसौ
म्यो हव्यकव्यप्रदायकः ॥ ३४ ॥ अंगारकोगदोऽगस्ती रक्तांगश्चांगवर्धनः ॥ बुधो बुद्धासनो बुद्धिर्बुद्धात्माबुद्धिवर्धनः
॥ ३५ ॥ बृहद्भानुर्बृहद्भासा बृहद्भामाबृहस्पतिः ॥ शुक्रस्त्वं शुक्रेतास्त्वं शुक्रांगः शुक्रभूषणः ॥३६॥ शनिमान् शनिरूप
स्त्वं शनैर्गच्छसि सर्वदा ॥ अनादिरादिरादित्यस्तेजोराशिर्महातपाः ॥ ३७ ॥ अनादिरादिरुपस्त्वमादित्योदिक्पतिर्यमः
॥ भानुमान् भानुरूपस्त्वं स्वर्भानुर्भानुदीप्तिमान् ॥ ३८ ॥ धूमकेतुर्महाकेतुः सर्वकेतुरनुत्तमः ॥ तिमिरावरणः शंभुः स्रष्टामा
र्तंड एव च ॥ ३९ ॥ नमः पूर्वायगिरये पश्चिमाय नमोनमः ॥ नमोत्तराय गिरये दक्षिणाय नमोनमः ॥ ४० ॥ नमो न
मःसहस्रांशोआदित्याय नमो नमः ॥ नमः पद्मप्रबोधाय नमस्ते द्वादशात्मने ॥ ४१ ॥ नमो विश्वप्रबोधाय नमोऽग्नि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्णुजिष्णवे ॥ ज्योतिषे च नमस्तुभ्यं ज्ञानार्काय नमोनमः ॥ ४२ ॥ प्रदीप्तायप्रगल्भाय युगांताय नमो नमः ॥ नमस्ते हो तृपतये पृथिवीपतये नमः ॥ ४३ ॥ नमोंकारवषट्कारसर्वयज्ञनमोस्तुते ॥ ऋग्वेदाययजुर्वेदसामवेदनमोऽस्तुते ॥ ४४ ॥ न मो हाटकवर्णाय भास्कराय नमो नमः ॥ जयायजयभद्राय हरिदश्वाय ते नमः ॥ ४५ ॥ दिव्यायदिव्यरूपाय ग्रहाणां पतये नमः ॥ नमस्ते शुचये नित्यं नमःकुरुकुलात्मने ॥ ४६ ॥ नमस्त्रैलोक्यनाथाय भूतानां पतये नमः ॥ नमः कैव ल्यनाथायनमस्ते दिव्यचक्षुषे ॥ ४७ ॥ त्वं ज्योतिस्त्वं द्युतिर्ब्रह्मात्वंविष्णुस्त्वं प्रजापतिः ॥ त्वमेवरुद्रो रुद्रात्मावायुरग्नि स्त्वमेवच ॥ ४८ ॥ योजनानां सहस्रे द्वे द्वे शते द्वे च योजने ॥ एकेन निमिषार्धेन क्रममाणनमोस्तुते ॥ ४९ ॥ न व योजन लक्षाणिसहस्राद्विशतानि च ॥ यावद्धटीप्रमाणेन क्रममाणनमोऽस्तुते ॥ ५० ॥ अग्रतश्चनमस्तुभ्यं पृष्ठतश्च सदा नमः ॥ पार्श्वतश्च नमस्तुभ्यं नमस्तेचास्तुसर्वदा ॥ ५१ ॥ नमःसुरारिहंत्रे च सोमसूर्याग्निचक्षुषे ॥ नमोदिव्या य व्योमाय सर्वतंत्रमयाय च ॥ ५२ ॥ नमो वेदांतवेद्याय सर्वकर्मादिसाक्षिणे ॥ नमो हारितवर्णायसुवर्णाय नमोन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मः ॥ ५३ ॥ अरुणोमाघमासे तु सूर्यो वै फाल्गुने तथा ॥ चैत्रमासेतुवेदांगो भानुर्वैशाखतापनः ॥ ५४ ॥ ज्येष्ठमासे तपेदिंद्र आषाढेतपतेरविः ॥ गभस्तिः श्रावणे मासि यमोभाद्रपदे तथा ॥ ५५ ॥ इषेसुवर्णरेताश्च कार्तिके च दिवाकरः॥ मार्गशीर्षेतपेन्मित्रः पौषेविष्णुः सनातनः ॥ ५६ ॥ पुरुषस्त्वधिकेमासे मासाधिक्येतु कल्पयेत् ॥ इत्येतेद्वादशादित्याः काश्यपेयाः प्रकीर्तिताः ॥ ५७ ॥ उग्ररूपा महात्मानस्तपंते विश्वरूपिणः ॥ धर्मार्थकाममोक्षाणांप्रस्फुटा हेतवोनृप ॥ ५८ ॥ सर्वपापहरं चैवमादित्यं संप्रपूजयेत् ॥ एकधा दशधा चैव शतधा चसहस्रधा ॥ ५९ ॥ तपंतेविश्वरूपेण सृजन्तिसंहरन्तिच ॥ एषविष्णुः शिवश्चैव ब्रह्माचैव प्रजापतिः ॥ ६० ॥ महेंद्रश्चैव कालश्च यमोवरुण एवच॥ नक्षत्रग्रहतारागामधिपोविश्वतापनः ॥ ६१ ॥ वायुरग्निर्धनाध्यक्षो भूतकर्ताःस्वयंप्रभुः ॥ एषदेवोहि देवानां सर्वमाप्यायते जगत् ॥ ६२ ॥ एषकर्ताहिभूतानांसंहर्ता रक्षकस्तथा ॥ एषलोकानुलोकाश्च सप्तद्वीपाश्च सागराः ॥ ६३ ॥ एषपातालसप्तस्था दैत्यदानवराक्षसाः ॥ एषधाता विधाताच वीजंक्षेत्रं प्रजापतिः ॥ ६४ ॥ एकएव प्रजानित्यं संवर्धयतिरश्मिभिः एष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यज्ञः स्वधा स्वाहा ह्रीःश्रीश्च पुरुषोत्तमः॥ ६५॥ एषभूतात्मको देवःसूक्ष्मो व्यक्तः सनातनः॥ईश्वरः सर्वभूतानां परमेष्ठीप्रजापतिः॥ ६६॥ कालात्मा सर्वभूतात्मा वेदात्मा विश्वतोमुखः॥ जन्ममृत्युजराव्याधिसंसारभयनाशनः॥ ६७॥ दारिद्र्यव्यसनध्वंसी श्रीमान्देवोदिवाकरः॥ विकर्तनोवीवस्वांश्चमार्तंडो भास्करोरविः॥ ६८॥ लोकप्रकाशकः श्रीमाल्लोकचक्षुर्ग्रहेश्वर॥ लोकसाक्षी त्रिलोकेशःकर्ता हर्ता तमिस्रहा॥ ६९॥ तपनस्तापनश्चैव शुचिःसप्ताश्ववाहनः॥ गभस्तिहस्तो ब्रह्मण्यःसर्वदेवनमस्कृतः॥ ७०॥ आयुरारोग्यमैश्वर्यं नरानार्यश्रमन्दिरे॥ यस्य प्रसादात्सन्तुष्टिरादित्यत्तदयं जपेत्॥ ७१॥ इत्येतै र्नामभिःपार्थ आदित्यं स्तौतियो नरः॥ प्रातरुत्थाय कौन्तेय तस्य रोगभयं न हि॥ ७२॥ पातकान्मुच्यतेपार्थ व्याधिभ्यश्च नसंशयः॥ एकसंध्यं द्विसंध्यंवा सर्वपापैः प्रमुच्यते॥ ७३॥ त्रिसंध्यं जपमानस्तु पश्येच्च परमंपदम्॥ यदन्हाकुरुते पापंतदन्हाप्रतिमुच्यते॥ ७४॥ यद्रात्र्याकुरुतेपापंतद्रात्र्याप्रतिमुच्यते॥ दद्रुस्फोटककुष्ठानि मंडलानि विषूचिका॥ ७५॥ सर्वव्याधिमहारोगा भूतवाधास्तथैव च॥ डाकिनी शाकिनीचैव महा रोग भयं कुतः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ७६ ॥ येचान्ये दूष्टरोगाश्च ज्वरातिसारकादयः ॥ जपमानस्यनश्यंतिजिवेच्च शरदां शतम् ॥ ७७ ॥ संवत्सरेण मरणंयदातस्यधुवंभवेत् ॥ अशीर्षा पश्यति च्छायामहोरात्रं धनंजय ॥ ७८ ॥ यस्त्विदंपठतेभक्त्याभानोर्वारेमहात्मनः ॥ प्रातस्नानेकृतेपार्थएकाग्रकृतमानसः ॥ ७९ ॥ सुवर्णचक्षुर्भवतिन चांधस्तुप्रजायते ॥ पुत्रवान्धनसंपन्नो जायतेचारुजःसुखी ॥ ८० ॥ सर्वसिद्धिमवाप्नोति सर्वत्रविजयी भवेत् ॥ आदित्यहृदयं पुण्यं सूर्यनामविभूषितं ॥ ८१ ॥ श्रुत्वा चनिखिलं पार्थसर्वपापैःप्रमुच्यते ॥ अतःपरतरं नास्ति सिद्धिकामस्यपांडव ॥ ८२ ॥ एतज्जपस्व कौंतेय येनश्रेयो ह्यवाप्स्यसि ॥ आदित्यहृदयं नित्यं यःपठेत्सुसमाहितः ॥ ८३ ॥ भ्रूणहा मुच्यते पापात्कृतघ्नो ब्रह्मघातकः ॥ गोघ्नः सुरापोदुर्भोजि दुष्प्रतिग्रहकारकः ॥ ८४ ॥ पातकानिच सर्वाणि दहत्येवनसंशयः य इदं शृणुयान्नित्यं जपेद्वाऽपिसमाहितः ॥ ८५ ॥ सर्वपापविशुद्धात्मा सूर्यलोके महियते ॥ अपुत्रो लभतेपुत्रान्निर्धनो धनमाप्नुयात् ॥ ८६ ॥ कुरोगी मुच्यते रोगाद्भक्त्या यः पठते सदा ॥ यस्त्वादित्य दिने पार्थ नाभिमात्रजले स्थितः ॥ ८७ ॥ उदयाचलमारूढं भास्करं प्रणतः स्थितः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जपेतमानवो भक्त्या शृणुयाद्वापी भक्तितः ॥ ८८ ॥ सयाती परमं स्थानं यत्र देवो दीवाकरः ॥ अमित्रदमनं पार्थ यदा कर्तुं समारभेत् ॥ ८९ ॥ तदा प्रतीकृतीं कृत्वा शत्रोश्चरणपांसुभीः ॥ आक्रम्य वामपादेनह्यादित्यत्हृदयं जपेत् ॥ ९० ॥ एतन्मंत्रंसमाहूय सर्वसीद्धीकरंपरम् ॥ ॐह्रींहीमालीढंस्वाहा ॥ ॐह्रींनिलीढंस्वाहा ॥ ॐह्रींमालीढंस्वाहा ॥ इतीमंत्रः ॥ त्रिभिश्चरोगी भवतिज्वरीभवति पञ्चभिः ॥ जपैस्तुसप्तभिः पार्थ राक्षसीतनुमाविशेत् ॥ ९१ ॥ राक्षसेनाभिभूतस्य विकारान् शृणुपाण्डव ॥ गीयते नृत्यते नग्न आस्पाट्यति धावति ॥ ९२ ॥ शिवारुत ञ्च कुरुते हसते क्रन्दतेपुनः ॥ एवं संपीड्यते पार्थ यद्यपि स्यान्महेश्वरः ॥ ९३ ॥ किं पुनर्मानुषः कश्चि च्छौचाचारविवर्जित ॥ पीडितस्य नसंदेहोज्वरोभवतिदारुणः ॥ ९४ ॥ यदा चानुग्रहंतस्यकर्तुमिच्छेच्छुभंकरम् ॥ तदासलिलमादाय जपेन्मंत्रमिमंबुधः ॥ ९५ नमोभगवतेतुभ्यमादित्यायनमोनमः ॥ जयायजयभद्राय हरिदश्वायते नमः ॥ ९६ ॥ स्नापयेत्तेनमन्त्रेण शुभंभवति नान्यथा ॥ अन्यथा चभवेद्दोषोनश्यतेनात्रसंशयः ॥ ९७ ॥ अतस्तेनिखिलःप्रोक्तः पूजां चैव निबोधमे ॥ उपलिप्त शुचौदे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शेनियतो वाग्यतः शुचि ॥ ९८ ॥ वृत्तंवा चतुरस्रं वा लिप्तभुमौलिखेच्छुचिः ॥ त्रिधा तत्र लिखेत्पद्म मष्टपत्रंस कार्णिकम् ॥ ९९ ॥ अष्टपत्रंलिखेत्पद्मंलिप्तगोमयमंडले ॥ पूर्वपत्रे लिखे त्सूर्यमाग्नेय्यांतु रविंन्यसेत् ॥ १०० ॥ याम्यायां च विवस्वंतंनै ऋत्यां तु भगंन्यसेत् ॥ प्रतीच्यां वरुणंविंद्याद्वायव्यां मित्रमेव च ॥ १ ॥ आदित्यमुत्तरेपत्रे ईशान्यां विष्णुमेव च ॥ मध्येतुभास्करं विंद्यात्क्रमेणैवं समर्चयेत् ॥ २ ॥ अतः परतरं नास्ति सिद्धिकामस्य पांडव ॥ महातेजःसमुद्यंतं प्रण मेत्सकृतां जलिः ॥ ३ ॥ सकेसराणि पद्मानि करवीराणिचार्जुन ॥ तिलतण्डुलयुक्तानि कुशगंधोदकानिच ॥ ४ ॥ रक्तचंदनमिश्राणि कृत्वा वैताम्रभाजने ॥ धृत्वा शिरसि तत्पात्रं जानुभ्यां धरणीं स्पृशेत् ॥ ५ ॥ मंत्रपूतंगुडाकेश चार्घ्यं दद्याद्भभस्तये ॥ सायुधं सरथंचैव सूर्यमावाहयाम्यहम् ॥ १०६ ॥ स्वागतो भव सुप्रतिष्ठितो भव ॥ सन्निधो भव॥ सन्निहितोभव संमुखोभव इति पञ्चमुद्राः ॥ स्फुटयीत्वार्ह्येयंसूर्यं भुक्तिं मुक्तिंलभेन्नरः ॥ १०७ ॥ ॐश्रीं वि द्याकिलिकिलिकटकेष्टसर्वार्थसाधनाय स्वाहा॥ ॐश्रींह्रींह्रूंहंसः सूर्यायनम स्वाहा ॥ ॐश्रींह्रांह्रींह्रूंह्रैंह्रौंह्रः सूर्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मूर्तये स्वाहा ॥ ओन्हूंमार्तण्डाय स्वाहा ॥ नमोस्तु सूर्यायसहस्रभानवे नमोस्तु वैश्वानरजातवेदसे ॥ त्वमेव चार्घ्यं प्रतिगृ
ह्ण देव देवाधिदेवायनमो नमस्ते ॥ ८ ॥ नमो भगवते तुभ्यंनमस्ते जातवेदसे ॥ दत्तमर्घ्यं मया भानोत्वंगृहाण न
मोस्तुते ॥ ९ ॥ एहि सूर्यसहस्रांशो तेजोराशे जगत्पते ॥ अनुकंपय मांदेव गृहाणार्घ्यंनमोऽस्तुते ॥ ११० ॥ नमोभ
गवते तुभ्यं नमस्तेजातवेदसे ॥ ममेदमर्घ्यंगृह्ण त्वंदेवदेवनमोऽस्तुते ॥ ११ ॥ सर्वदेवाधिदेवाय आदिव्याधिविनाशि
ने ॥ इदंगृहाण मेदेव सर्वव्याधिर्विनश्यतु ॥ १२ ॥ नमः सूर्याय शांताय सर्वरोगविनाशिने ॥ ममेप्सितं फलं दत्वाप्र
सीद परमेश्वर ॥ १३ ॥ ॐ नमो भगवतेसूर्याय स्वाहा ॐ शिवाय स्वाहा ॐसर्वात्मने सूर्यायनमःस्वाहा ॥
ॐ अक्षय्यतेजसेनमःस्वाहा सर्वसंकटदारिद्र्यंशत्रंनाशय नाशय ॥ सर्वलोकेशविश्वात्मन्सर्वात्मन्सर्वदर्शक ॥ १४ ॥ न
मो भगवते सूर्यकुष्ठरोगान्विखंडय ॥ आयुरारोग्यैमैश्वर्यं देहि देवनमोस्तुते ॥ १५ ॥ नमोभगवतेतुभ्यमादित्यायनमोनमः
ॐअक्षय्यतेजसेनमः ॐसूर्य्यायनमः ॥ आदित्यंच शिवं विद्याच्छिवमादित्यरूपिणं ॥ उभयोरंतरंनास्ति आदित्यस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिवस्यच ॥ १६ ॥ एतदिक्षाम्यहं श्रोतुं पुरुषोवैदिवाकरः ॥ उदये ब्रह्मणो रूपं मध्यान्हे तु महेश्वरः ॥ १७ ॥ अस्तमाने स्वयंविष्णुस्त्रिमूर्तिश्च दिवाकरः ॥ नमो भगवतेतुभ्यं विष्णवे प्रभाविष्णवे ॥ १८ ॥ममेदमर्घ्यंप्रतिगृह्यदेवदेवाधिदेवाय नमोनमस्ते ॥ श्रीसूर्यायसांगायसपरिवाराय श्रीसूर्यनारायणायेदमर्घ्यम् ॥ १९ ॥ हिमघ्नाय तमोघ्नाय रक्षोघ्नाय चते नमः ॥ कृतघ्नघ्नाय सत्याय तस्मै सूर्यात्मने नमः ॥ १२० ॥ जयो जयश्च विजयो जितप्राणो जितश्रमः ॥ मनोजवो जितक्रोधो वाजिनःसप्तकीर्तिताः ॥ २१ ॥ हरितहयरथं दिवाकरं कनकमयांबुजेरणुपिंजरम् ॥ प्रतिदिनमुदये नवं नवं शरणमुपैमि हिरण्यरेतसम् ॥ २२ ॥ न तं व्यालाः प्रबाधंते न व्याधिभ्योभयंभवेत् ॥ न नागेभ्यो भयं चैव न चभूतभयं क्वचित् ॥ २३ ॥ अग्निशत्रुभयंनास्ति पार्थिवभ्य स्तथैवच ॥ दुर्गतीं तरते घोरां प्रजांच लभते पशून् ॥ २४ ॥ सिद्धि कामो लभेत्सिद्धिं कन्याकामस्तुकन्यकाम् ॥ एतत्पेठत्सकौंतेय भक्तियुक्तेन चेतसा ॥ २५ ॥ अश्वमेधसहस्रस्यवाजपेयशतस्य च ॥ कन्याकोटिसहस्रस्य दत्तस्य फलमाप्नुयात् ॥ २६ ॥ इदमादित्यहृदयं योऽधीते सततं नरः ॥ सर्वपा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पविशुद्धात्मा सूर्यलोकेमहीयते ॥ १२७ ॥ नास्त्यादित्यसमोदेवोनास्त्यादित्यसमा गतिः ॥ प्रत्यक्षोभगवान्विष्णुर्येनविश्वंप्रतिष्ठितम् ॥ १२८ ॥ नवतिर्योजनंलक्षं सहस्राणिशतानिच ॥ याव द्घटीप्रमाणेन तावच्चरतिभास्करः ॥ १२९ ॥ गवां शतसहस्रस्य सम्यग्दत्तस्ययत्फलम् ॥ तत्फलंलभतेविद्वान् शांतात्मास्तौतियोरविम् ॥ १३० ॥ योधीते सूर्यहृदयं सकलंसफलंभवेत् ॥ अष्टानांब्राह्मणानांतु लिखित्वायःसमर्पयेत् ॥ १३१ ॥ ब्रह्मलोके ऋषीणां च जायते मानु षो ऽपि वा ॥ जातिस्मरत्वमाप्नोति शुद्धात्मानात्रसंशयः ॥ ३२ ॥ अजाय लोकत्रयपावनाय भूतात्मने गोपतयेवृषाय ॥ सूर्यायसर्वप्रलयान्तकाय नमोमहाकारुणिकोत्तमाय ॥ ३३ ॥ विकर्त्तने ज्ञानघृणेतरात्मने जगत्प्रदीपायजगद्धितैषिणे ॥ स्वयंभुवे दीप्तसहस्रचक्षुषे सुरोत्तमायामिततेजसे नमः ॥ ३४ ॥ सुरैरनेकैः परिसेविताय हिरण्यगर्भाय हिरण्मयाय ॥ महात्मने मोक्षपदाय नित्यंनमोऽस्तुते वासरकारणाय ॥ ३५ ॥ आदित्यश्चार्चितो देव आदित्यः परमं पदम् ॥ आदित्यामातृकंभूत्वा आदित्यावाङ्मयंजगत् ॥ ३६ ॥ आदित्यं पश्यते भक्त्यामां पश्यतिध्रुवं नरः ॥ नादित्यंपश्यते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भक्त्या न स पश्यतिमानरः ॥ ३७ ॥ त्रिगुणं च त्रितत्वंच त्रयोदेवा स्त्रयोऽग्नयः ॥ त्रयाणां च त्रिमूर्तिस्त्वं तुरीयस्त्वं न
मोस्तुते ॥ ३८ ॥ नमः सवित्रेजगदेकचक्षुषे जगत्प्रसूतिस्थितिनाशहेतवे ॥ त्रयीमयाय त्रिगुणात्मधारिणे विरिंचि
नारायणशंकरात्मने ॥ ३९ ॥ यस्योदयेनेहजगत्प्रबुद्धयतेप्रवर्ततेचाखिलकर्मसिद्धये ॥ ब्रह्मेंद्रनारायणरुद्रवान्दितः सनः
सदायच्छतुमंगलंरविः ॥ १४० ॥ नमोस्तुसूर्यायसहस्ररश्मयेसहस्रशाखान्वितसंभवात्मने ॥ सहस्रयोगोद्भवभावभागिने स
हस्रसंख्यायुगधारिणे नमः ॥ ४१ ॥ यन्मंडलंदीप्तिकरंविशालंरत्नप्रभंतीव्रमनादिरूपम् ॥ दारिद्र्यदुःखक्षयकारणं चपुना
तुमां तत्सवितुर्वरेण्यम् ॥ ४२ ॥ यन्मंडलंदेवगणैःसुपूजितं विप्रैःस्तुतंभावनमुक्तिकोविदम् ॥ तंदेवदेवंप्रणमामिसूर्यं
पुनातुमांतत्सवितुर्वरेण्यम् ॥ ४३ ॥ यन्मंडलंज्ञानघनंत्वगम्यंत्रैलोक्यपूज्यं त्रिगुणात्मरूपम् ॥ समस्ततेजोमयादिव्परूप
पुनातुमांतत्सावि० ॥ ४४ ॥ यन्मंडलंगूढमतिप्रबोधं धर्मस्यवृद्धिंकुरुतेजनानाम् ॥ तत्सर्वपापक्षयकारणञ्चपुनातुमांत०
॥ १४५ ॥ यन्मण्डलंव्याधिविनासदुःखं यद्ग्यजुःसामसु संप्रगीतम् ॥ प्रकाशितंयेनचभूर्भुवःस्वःपुनातुमांतत्स० ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यन्मंडलंवेदाविदोवदंतिगायंतियच्चारणसिद्धसंघाः ॥ यद्योगिनोयोगजुषांचसंघाः पुनातुमां० ॥ ४७ ॥ यन्मंडलंसर्व जनेषुपू
जितंज्योतिश्चक्रुर्यादिहमर्त्यलोके ॥ यत्कालकालादिमनादिरूपंपुनातुमांतत्स० ॥ ४८ ॥ यन्मंडलंविष्णुचतुर्भुखाख्ंययदक्ष
रंपापहरंजनानाम् ॥ यत्कालकल्पक्षयकारणंचपुनातुमांतत्स० ॥ ४९ ॥ यन्मंडलंविश्वसृजां प्रसिद्धमुत्पत्तिरक्षा प्रलयप्रग
लभम् ॥ यस्मिन्जगत्संहरतेऽखिलंचपुनातुमांतत्स० ॥ ५० ॥ यन्मंडलंसर्वगतस्यविष्णोरात्मापरंधामविशुद्धतत्त्वम् ॥ सू
क्ष्मांत रैर्योगपथानुगम्यं पुनातुमांतत्स- ॥ ५१ ॥ यन्मंडलंब्रह्मविदोवदंतिगायंतियच्चारणसिद्धसंघाः ॥ यन्मंडलंवेदविदःस्म
रंतिपुनातुमांतत्स० ॥ ५२ ॥ यन्मंडलंवेदविदोपगीतमयद्योगिनांयोगपथानुगम्यम् ॥ तत्सर्ववेदंप्रणमामिसूर्यंपुनातुमांत
त्स० ॥ ५३ ॥ मंडलाष्टमिदं पुण्यं यः पठेत्सततंनरः ॥ सर्वपापविशुद्धात्मा सूर्यलोकेमहीयते ॥ ५४ ॥ ध्येयः सदासवि
तृमण्डलमध्यवर्ती नारायणःसरसिजासनसन्निविष्टः ॥ केयूरवान्मकरकुण्डलवान्किरीटी हारीहिरण्मयवपुर्धृतशङ्खचक्रः
॥ ५५ ॥ सशङ्खचक्रंरविमण्डलेस्थितं कुशेशयाक्रान्तमनन्तमच्युतम् ॥ भजामिभक्त्यातपनीयमूर्तिसुरोत्तमंचित्रविभू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षणोज्ज्वलम् ॥ ५६ ॥ एवंब्रह्मादयो देवा ऋषयश्च तपोधनाः ॥ कीर्तयन्तिसुरश्रेष्ठं देवंनारायणं विभुम् ॥ ५७ ॥
वदवेदांगशरीरं दिव्यदीप्तिकरंपरम् ॥ रक्तोनंरक्तवर्णञ्च सृष्टिसंहारकारकम् ॥ ५८ ॥ एकचक्ररथोयस्य दिव्यःकनकभू
षितः ॥ समे भवतु सुप्रीतः पद्महस्तो दिवाकरः ॥ ५९ ॥ आदित्यःप्रथमं नाम द्वितीयं तु दिवाकरः ॥ तृतीयं भास्क
रःप्रोक्तं चतुर्थंतु प्रभाकरः ॥ १६० ॥ पंचमं तु सहस्रांशुः षष्ठंचैव त्रिलोचनः ॥ सप्तमं हरिदश्व श्च अष्टम न्तु
विभावसुः ॥ ६१ ॥ नवमंदिनकृत्प्रोक्तं दशमंद्वादशात्मकम् ॥ एकादशं त्रयीमूर्तिर्द्वादशंसूर्य एव च ॥ ६२ ॥ द्वाद
शादित्यनामानि प्रातः कालेपठेन्नरः ॥ दुःस्वप्ननाशनं चैव सर्वदुःखं च नश्यति ॥ ६३ ॥ दद्रुकुष्ठहरं चैव दारिद्र्यं हरते ध्रु
वं ॥ सर्वतीर्थप्रदं चैव सर्वकामप्रवर्धनं ॥ ६४ ॥ यःपठेत्प्रातरुत्थाय भक्त्यानित्यमिदं नरः ॥ सौख्यमायुस्तथाऽरोग्यंल
भतेमोक्षमेव च ॥ ६५ ॥ अग्निमीलेनमस्तुभ्यमिषेत्वोर्जेस्वरूपिणे ॥ अन्नआयाहिवीतस्त्वं नमस्तेज्योतिषांपते ॥ ६६ ॥
शन्नोदेवि नमस्तुभ्यं जगच्चक्षुर्नमोस्तुते ॥ पंचमायोपवेदाय नमस्तुभ्यं नमो नमः ॥ ६७ ॥ पद्मासनः पद्मकरः पद्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

गर्भसमद्युतिः ॥ सप्ताश्वरथसंयुक्तो द्विभुजः स्यात्सदा रविः ॥ ६८ ॥ आदित्यस्य नमस्कारं ये कुर्वंति दिने दिने ॥ ज
न्मांत[illegible]स्तेषुदारिद्र्यं नोपजायते ॥ ६९ ॥ उदयगिरिमुपेतंभास्करं पद्महस्तंनिखिलभुवननेत्ररत्नरत्नोपमेयम् ॥ तिमिरक
रिमृगें[illegible]धकंपद्मिनीनां सुर वरमभिवंदे सुंदरंबिम्बबंधम् ॥ १७० ॥ इति श्रीभविष्योत्तरपुराणे श्रीकृष्णार्जुनसंबादे आ
दित्यहृदयस्तोत्रंसंपूर्णम् श्रीसूर्यनारायणार्पणमस्तु ॥ ॥ ६ ६ ६ ६ ६

इदम्पुस्तकम्पाण्डितमोति कृष्ण शर्मणा नेपालनगर्य्यां
स्वीययन्त्रालये मुद्रयित्वा प्राकाश्यं नीतम्

अस्मद्ठैहीटीस्थ पुस्तकापंणे भाषा सँस्कृत पुस्तकानि स्वल्पमूल्येन लभ्यन्ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति आदित्यहृदय समाप्तः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu